श्वस्यति मैथुनार्थमश्वमिच्छतीत्यर्थः वृषमिच्छति मैथुनार्थं वृषस्यति क्षीरलवणयोर्लाल
सायां उत्कंठेच्छायां सक ये लालसया क्षीरमिच्छति क्षीरस्यति लवणस्य नाम्नो ये लालसा
यां सुगसुकौ नाम्नः सुगसुकावागमौ भवतः यप्रत्यये परे तत्र सातिरेको लालसा तस्यामर्थे
दधिस्यतीत्यपभ्रंशः स्वइति विपरीतनिर्देशान्नषत्वं मांताव्ययाभ्यां काम्यः मांतप्रकृतिकान्नाम्नो
ऽव्ययाच्च काम्यः स्यात् इच्छायां करणे च यइस्यन्नमःकरोतीत्यर्थः नमः करोतीति नमस्यति
देवान्पूजयतीत्यर्थः वरीवस्यति गुरून्शुश्रूषते इत्यर्थः शब्दादिभ्यो यइ एभ्यः कर्मभ्यः
करोत्यर्थे यइ शब्दं करोतीति शब्दायते पक्षे जिडिकरणे इति जिशब्दस्य लोपो भवति शब्दय

२५

तीतिन्यासकारः चतुर्थ्यंता कष्टशब्दात्सदार्थे यङ् कष्टाय क्रमते कष्टायते पापं कर्तु
मुत्सहत इत्यर्थः उष्मवाष्पधूमफेनोद्वमने णिङः कर्मभ्यो यङ् उष्मायते सुखमुपत्तिना सु
नो लोपश्चेति नस्य लोपः ये इति दीर्घः उष्मायते त्रिविडितूकरणेन तद्रोति तदाचष्टे वे
त्यर्थे नाम्नो णिः सर्वत्र डिन्नाडिति टेरिति टेर्लोपो भवति घटमाचष्टे घटयति लङि
परत्वाद्वृद्धौ सत्यां टिलोपः अजीघटत् भाष्यतद्वृद्धिः लोपो बलीयानिति स्मृतेन सर्वे लोपस्त
तेः स्थूलोपि त्वाद्भाङ् कार्यं अजीघटत् एवं मदान्तमाचष्टे मदयति नाविष्टवत्कार्ये इष्ठ
न्ये परतो यत्कार्यं दृष्टं संभावितं चतत्रान्तेनाचाति दिशपते दृष्टे यथाविन्मतुवतूनां लो
परभावो गुर्वादेर्गराद्यादेः शान्य लोपोतद्वत्ताजावपि स्य्रः स्रग्विणमाचष्टे स्रजयति श्वि
नमाचष्टे श्वयति दंडवन्तमाचष्टे दंडयति लुङि असस्रजत् अशश्वयत् अददंडत् अलो
पस्यस्थानिवत्त्वान्न स्य लोपो न स्थूलं करोति गुर्वादिरिष्ठेमेयस्सु गरादिः स्य लोपश्चेति

सा·
३·

स्थूलस्य स्थो इति लोपाभावश्च स्थवयति लुङि अतस्थवत् दूरं करोति दूरस्य दोः दवयति
लुङि अदूदवत् कथंतर्हिदूरयत्यवनतेर्विवस्वतीतिदूरात् क्षिप्रंवतः तत्कुर्वतीत्यर्थः
युवानंकरोति युवन् शब्दस्य लोपो यवयति युवाल्पयोः कनेतिकन् कनयति लुङि अ
पयत् अचीकनत् इष्टवद्भावः सर्वत्रनिर्दिष्ट इति तेनैव ह्रस्वलघ्वादेशाकर्त्तव्यं त
स्मात् ह्रस्वंकरोतिह्रस्वस्यह्रस इत्यादेशे पूर्ववत् क्वचिद्विधेरनित्यत्वात् ह्रस्वलघुदीर्घाणां ह्रानु
वृद्धिः मात्येवं नत्वविकल्पेन वृद्धिरुदात्ता ह्रसयति अजीह्रसत् क्षिप्रंकरोतीति
क्षिप्रस्य क्षेप क्षेपयति अचिक्षिपत् क्षुद्रंकरोति क्षुद्रस्य क्षोदो क्षोदयति अचुक्षुदत्
प्रियंकरोतिप्रियस्यप्रः यातोनामिनइतिवृद्धौ यातोज्ञाविति पुक् प्रापयति अपि
प्रियत् गुरुंकरोतिगुरोर्गरः गरयति अजीगरत् स्थिरंकरोति स्थिरस्य स्थः ९
स्थापयति अतिष्ठपत् वहनमूढिं लोऽ ऊढिंकरोति ऊढयति ऊढिमाख्यत् औ

३·

ड्डित् अडि॰ पूर्वस्य उस्य ओ वा पूर्वरूपस्य स्य उकारस्य ओ वा भवति अउ॰ प्रत्यये परे औ
ज्जिडत् अड्डुकोगोतिऊढयति लुङि॰ टिलोपश्च सति जस्यादित्तस्य द्वित्वे पश्चात् सर्वस्य का
रोऽहले भउच्यते निनिमित्तं स्वरादेशः त्वेनेनढस्य द्वित्वे ऊढमाव्यत् ओऽढत् जवेडौ
जढत् कर्त्तेयउ॰ आचारउपमानात् कर्त्तृनाम्न आचारेयउ॰ आदन्नुदातङि॰ तत्त्वात् शपेनी
वाचरतियउ॰ मालिनोरितिपूर्वन्तयेरितिदीर्घः शपेनायनेयङि॰ वा सलोपः सान्तस्य क
न्तु सस्य वा लोपः आपसरसश्ओजसस्य मनसां नित्यं ओजः शाह्वस्तद्वतिहृत्तो ओजसी
वाचरतीति ओजायते नाम्न आचारे किप्वा कर्त्तृरूपमानान्नाम्नः किपवास्यात् आ
चारेऽर्थे नामत्वमस्य सिवंतयास्तेतनविभक्त्याश्रियं कार्येनपदेयउ॰ हृसम्रवाचरतीति
सृयात्रीरितिधात्वत्वातिवाटि अदेरस्यलोपः हृसमरति अं॰कसलहदाचरति अदे
रस्यलोपः अतिलिटिन काशादिपस्यादितिसूत्रेषत्वयथदृणामपनीयानेकस्वरा

स्व°
३१

दित्युक्ते नामद्धिं त्वमाददे इत्य लोपे प्राप्ते परत्वात् दाम्भो णौ मा वित्ति पूर्वस्मात् त्वं तत आतो णौ पञ्चा
वित्ति ङेः डित्कारि लोपे श्रा यातो न पीत्या लोपे अवत् लुङि यामिरमिनम्य नामिती टमको आसी
त् आशिषि ये इति दीर्घः कवीयात् नामधातोर्हृद्धिर्वा सेोः सि प्रत्यये परे लुङि कैयट मते न हृ
द्धिः मायवत्स्व नामधातोरपि हृद्धि मिक्कतिविः पत्नीतद्वदाचरति वयति निटित्नुधातोरिति
यः विव्यतः आशिषि यारारो ये इति रिङ् पिप्रियात् दादेः ये इति लकुभवः सिलोपे इति
वुक् वाम्य नामिव्यक्त त्वेन धातु पाठस्य स्यैव ग्रहणात् अभावीत् श्रिस्तुङ्भ्यः इति न ङ्या
तुपाठस्याभावात् अद्रावीत् जमातस्यो यथा यादीर्घः कसादेः किति शान्तो दात इस्वदा
दरणो ङितिन्त यङ् लकि तस्य प्रत्यये शेषांतः दंदांतः यथा इवाचरति यथीनति अञ्जांत रे
गत्वादीर्घस्तनोन गुणो योरिवाचरति कोकसादावित्ति वस्य उत्वे गुणावादेशौ घवति
कोवत्सानद्वदाचरति कति लिरिधातोर्नामिनः इति हृद्धि आतो णौ पञ्चाविसोच कावित्ति

३१

हरदत्तः माधवस्तु णिपिह्निंवाधित्वायत उत्पलोपात् चकारमिहप्रमाद आचारउपमानात् नाम्नोय।
इत्यतोय इत्यनुवृत्ते आचरणमाचारः चेरभावे घञ् ज्ञानव्यवहारोवा उपमीयतेऽ नेनेत्युपमानेमाङः
करणेघुट् कर्मणउपमानाच्च नाम्नोयः स्यात् आचारेर्थेतस्मिन् येपरेसर्वस्यावर्णस्यईत्वंच राजान
मिवाचरतोस्य नाम्नोइतिनलोपेकृतेईत्वं राजीयति भृशादिभ्यः भुवनड्डावेच्चिपरेः अंसहस्यलोपश्च
भृशादीनामंतस्यहसस्यलोपश्चाड्डतडावेर्थेये इतिदीर्घः भृशायते किं वपि भृशादिभ्यः क्यिप्स्या
दभूत तड्डावेर्थे क्रमवस्तियोगोपवउपसर्गास्माकारे शर्वपदेधातुसंज्ञाद्दे तोप्रत्ययेचिकीर्षितेह्यथकृ
क्रियतेधातुसंज्ञाविधायकंप्रत्ययेकर्तुमिष्टमति उपसर्गात्तस्यशर्वपदेभिन्नेकर्तव्यमित्यर्थः चुरादे
संग्रामङ् युद्धेउत्तसमत्ज्ञापकः तेनमनसशब्दस्यागद् भवति समनायत स्वाबादिभ्योयङः कर्बरेऽ
भवेस्वादिभ्यः कर्मभ्योऽनुभवेऽर्थेयङः अनुभवकर्तौविचेत सुखादीनितुः अनुभवशब्दोज्ञा।
नवाचीतदेप्तमेवकर्तव्यंकर्ताचेत्सुखादिभिरत्वेपि सुखंवेदयते येइतिदीर्घः सुखायते कर्बरे

स॰
३२

निकिं संवेदयते परस्मा उदृपान्विशेषणत्वं तद्भिन्ने ऽनुभवः पुच्छादुदसने व्यसने पर्यसने च णिङ्। पु
च्छान्त्सनो णिङ् स्यात् उत्पुच्छयते उदसनं तेपने उदसनं विविधं विक्षेपो वा ऽसनं व्यसनं परितः समंतादसनं पर्यस
नं तस्मिन्नर्थे णित्वादात्म पुच्छमुदस्यति उत्पुच्छयते उदपुपुच्छत भाण्डात्समाचयने भाण्डात् णिङ्॥
स्यात् राशीकरणेऽर्थे संभाण्डयते लुङि समबभाण्डत चीवरादर्जने परिधाने च णिङ् चीवराण्यर्ज
यति परिधत्ते वा संचीवरयते लुङि समचिचीवरत अर्थवेदसत्यानामापुग्वक्तव्यः एषामापुगागमः
स्यात् णिप्रत्यये परे अर्थमाचष्टे करोति वा अर्थापयति पटीमाचष्टे णिप्रत्यये टिलोपः ततो निमि
त्ताभावे नैमित्तिकस्याप्यभावः २ इतीयोभावेनस्याप्यभावः पटयति पटुमाचष्टे स्रग्विमतीति
णौ वेटिलोपे च स्रग्वयति लुङि स्रग्वास्रग्वादिलोपे ऽग्लोपित्वाभावादङि लघावितिश्चर्वस्येव अ
पिस्रग्वत् स्रुग्वेरवं टिलोपे ऽत्र ग्लोपित्वादित्वेन असस्रग्वत् स्रग्विमाचष्टे नाविष्टवद्भावात् स्रग्वम

३२

तीतिरभावे टिलोपे प्रदयति एवंस्मशाक्षगा हरादयः तामी वाचष्टे टिलोपे तन्मदेकत्वे इतितन्म

द्यादेशौ च कृते ॥ न उपधायाश्च इति वृद्धौ नादयति मादयति युवामावां युष्मानस्मान्वाचष्टे विभक्तिप
रत्वाभावान्न युवावौ टिलोपे स्मति युष्मयति अस्मयति स्थानमाचष्टे णाविष्ठवद्भावात् स्थतो
वस्थ्वाचदीर्घः श्रुनयतीतिरूपं केचिदाहुः टिलोपे उत्वे च सन्देहो मन्तो श्रावयति लङि अशुश्रला।
पितान्न ह्रस्वः अशुश्रावत् विद्वांसमाचष्टे टिलोपे विद्वयति टिलोपे कृते वसोर्वेउभिसु त्वेन्द्राभावा
वादेशो च विदावयति श्वन्ये नित्यत्वात्पूर्वं मतुपश्चात् टिलोपः विदयति श्वपरे उदंचमाचष्टे णाविष्ठ
वद्भावात् तिरसस्तिर्य इत्यदीचः उदीचयतीत्ययोपसर्गपृथक्कृत्य ईचशब्दो दवनिः बहुलग्रहणाद्धि
लोपेन लभिउपसर्गात्समाकारमितीकारात्पूर्वमादो विशब्दस्याद्वितपश्चात् नेरितिमिलोपः ।
उदैचिचत् प्रत्यंचमाचष्टे अतोदीर्घश्चेत्यलोपे पूर्वस्य दीर्घः प्रतीचयति लङि विशब्दात्यागादि ।
लोपे कृते सर्वस्य पत्वे प्रत्यविचत् सुगामसवर्णोत्व इति प्रकृतिभावपक्षे प्रतीअचिचत् सम्यंचमा
चष्टे तिरसस्तिर्य इति समीच् समीचयति लङि समप्यचिचत् प्रकृतिभावपक्षे समीअचिचत् ति

स०
३३

तिर्यंचमाचष्टे अंचेष्टिलोपेनापहृतेपि तस्य बहिरंगत्वेनासिद्धत्वात्तिरीत्यस्याभावः छेदोरसंत्तो।
तिर्यापयति उपसर्गसमाकारत्वाभावादिह तिरसः पृथक्करणं नास्ति अतितिर्यापत् अडिलत्वा
विति ऋस्वस्वनाह्लोपित्वात् सध्र्यंचमाचष्टे टिलोपेनांचेरपहारे छेदोरसंत्तो सध्र्यापयति अंतिक
माचष्टे गुर्वादेरिति कस्य नेदादेशे नालोपः अपस्येत्यलोपः नेदयति लुङि अनिनेदत् बाढमाचष्टे
बाढस्य साधः साधयति असीसाधत् वृद्धमाचष्टे वृद्धस्य ज्यादेशः णौ ज्याविति पुक् ज्यापयति
अजिज्यपत् वृद्धस्य वर्षोपि वर्षयति अववर्षत् स्फिरमाचष्टे स्फिरस्य स्फः णौ ज्याविति पुक्
स्फापयति अपिस्फपत् उरुमाचष्टे उरुशब्दस्य वर् प्रत्ययपूर्वकविधेरनित्यत्वात् वाहकाद्यामाधे व
न विकल्पेन इष्ठिहिरुदाहृता वरयति वारयति अवीवरत् बहुलमाचष्टे बहुलस्य बंहः बंहयति नो
लोप इति नलोपः अग्लोपित्वात् अबिबंहत् तृप्रमाचष्टे तृप्रस्य त्रप त्रपयति अतित्रपत् दीर्घ
माचष्टे दीर्घस्य द्राघयति अदद्राघत् वृंदारकमाचष्टे वृंदारकस्य वृंदः वृंदयति अववृंदत इतिना।

३३

मथात्वप्रक्रिया ॐ कण्ड्वादिभ्योयक् स्वार्थे कंड्वादयोद्विधाधातवः प्रातिपदिकानिच नाम्नोत्व
विग्रहएव समप्रसज्जायां यगंतात् णिङ्दादिभ्यः ङ उत्पन्नेनाङ् प्रत्ययेप्राप्त सपर्या महीङ् पूजा
यां महीयते पूजांलभते इत्यर्थः आकृतिगणोयं इतिकण्ड्वादयः कंडूयते सप्रत्ययेद्विस्येति प्रथ
मंद्वित्वप्राप्ते कण्ड्वादेस्तस्यस्यद्वित्वं कंडूयियिषिति यप्रत्ययांतात् सप्रत्ययेत्वपक्षेपि नामधातुष्वद्वित्व
मित्याद्यनोत्रयाणाममन्तमस्यद्वित्वंभवति स्वादेस्तायेतस्यद्वित्वे पुत्रीयितुमिच्छति पुपुत्रीयिष
ति आत्मनः इन्द्रमिच्छति इंद्रीयति इंदिद्रीयते सप्रत्ययेतु द्रीयि इंद्रशब्दस्योऽन्यतस्यद्वित्वे इंदिद्रीयि
षति जेतात्सप्रत्ययेत्वप्रियशब्दात् न्याविष्टवद्भावेन प्रिय शब्दस्य प्रादेशस्ततोद्वित्वादि प्रियमा
ख्यातु माचष्टगे प्रेरयितुवेच्छति पिप्रापयिषति प्रियियपयिषति यङ् सज्जंतात्सप्रत्ययेतु वो
भूयिषति यङ्लिसातात् णिप्रत्ययेव वोभूयिषति ॥ इतिप्रत्ययमाला ॥ निविषादिः नेः प
रोविषादिरात्म वान् विश आदिर्यस्य सविषादिः आकारउच्चारणार्थः निविशतेयदिशिवापेट

सु॰
३४

इतिश्रीहर्षः निःकिं प्रविशति ग्रथ्यवग्रहणालत्ताणप्रतिप्रदोरूपरिभाषायांनेरुपसर्गस्यग्रहणा
तेनेहनमधुनिविशंतिभ्रमराः परिव्यवेभ्यः क्रियः परगामिफलार्थमिदंआत्मनेपदे विपराभ्यां
जेः आभ्यांजयतिरात्वान् आङोदाणोनत्वविक्रोशने परगामिफलार्थमिदं आङः मुखाद्दाते
मुखविकाशनादन्यत्रार्थेवर्तमानादात्मनेपदंस्यात् विद्यामादत्ते क्रीडआङःनुसंपरिभ्यःत्वती
यार्थस्यातेर्योगेनात्मनेपदं मानकमनुसमउतितेनसंहस्यर्थः समोऽकूजने समः परः क्रीडति
रात्वान् अकूजनेर्थे आगमेःक्षमायां आङःशपीत् जंतावुमेरात् तमायामर्थे आगमयस्वता
वत् मात्वरिष्ठास्त्यर्थः शिदेर्जिज्ञासायां शिक्षविद्योपादाने उमस्येनेदग्रहणां अनुदात्तेनता
देवात्मनेपदसिद्धेः किमर्थाकेः कालस्येहग्रहणां ग्रहणांधनुषि शिक्षतेधनुर्विषये ज्ञानेशक्तो
भवितुमिच्छतीत्यर्थः हरतेर्गतताच्छील्ये गतप्रकारः साहृश्यं पैतृकमश्वाःऽनुहरंतेमातृकंगा
वः पितर्मातश्चसाम्यस्यमततेपरिशीलयंतित्यर्थः ताच्छील्येकिं मातरमनुहरतीदमाहसप्तमा

३४

ते विवक्षिते न तु प्रकारान्तराच्छीलं किरतेर्हर्षजीविकाकुलायकरणेषु किरतेरात्मात् पष्ठवाच्य
पुहर्षादयो विषयाः तत्र हर्षो विक्षेपस्य कारणं इत्येषफले अपाच्चतुष्पाच्छकुनिकर्तृकेष्वालेख
ने अपात्किरतेः सुट् स्यात् हर्षादिष्वेव चतुष्पाच्छकुनिकर्तृकेष्वालेखनेभ्यति हर्षेणाभूमि
विलिखति वृषः हर्षादिष्विति किं अपकिरति कुसुमं इहास्मिन्न हर्षादिमात्रविवक्षया यद्यप्यात्म
नेपदं प्राप्तं तथापि सुडभावेनेष्यते इत्याहुः गजोपकिरति अत्र हर्षे सत्यप्यालेखनाभावात् सुडो
ऽप्राप्तिः आङि नुप्रच्छ्योः आङः परावेतावात्मनेपदौ भवतः आनुते प्रदादिः प्रच्छतीष्यायोत्सरा
दिः शप उपालंभे आक्रोशार्थात् शपतेः शपः परगामिफले शपथरूपेर्थे आत्मनेपदं भवति
कृष्णाय शपते ज्ञापयति क्रुडिति संप्रदानसंज्ञा समवप्रविभ्यः स्थः लङि अपिदायाप्याप्यामितीत्वं
समतिष्ठत समतिष्ठतालं यावः प्रतिज्ञायां शब्दं नित्यमातिष्ठते नित्यत्वेन प्रतीजानीते इत्यर्थः
स्वाभिप्रायाविष्करणे निर्णयार्थाञ्च स्वाभिप्रायस्य प्रकाशने विवादस्य निराकरणकर्तरि निर्णे

सि॰
३५

नातस्मिन्नर्थेच तिष्ठतेरात्मनात् गोपीकृष्णायतिष्ठते स्थितानेत्रादिविकारात् स्वाभिप्रायंज्ञापय
ति संशय्यकर्णादिषुतिष्ठतेयः संशयंविधायनिर्णेतृत्वेनकर्णादिनाश्रयतेइत्यर्थः उदोऽनूर्द्ध्वक
र्मणिईहायां उद्धाम्सर्वकोवेष्टाउद्दानस्यामेवनेह्यामासनादुत्तिष्ठति उत्पद्यतेइत्यर्थः उपान्मंत्रकरण
देवपूजासंगतिकरणमित्रकरणपथिषु एष्वर्थेषुउपात् तिष्ठतेः अग्निदेवताकयाचाग्नीध्रमग्निवि
शेषं स्तोत्रतत्समीपेतिष्ठतीत्यर्थः अग्निमिंधेइति अग्नीत् क्विवंतः अग्नीधः स्थाने आग्नीध्रंतत
स्योपाग्नीध्रः निपातनात्तद्धितेण्प्रत्ययः मंत्रकरणेकिं भर्तारमुपतिष्ठतियौवनेन आदित्यमु
पतिष्ठते आदित्यस्तोत्रतदभिमुखतयातिष्ठतीत्यर्थः गंगायमुनामुपतिष्ठते उपश्लिष्यतीत्यर्थः
रथिकान् उपतिष्ठते मैत्रीकरोतीत्यर्थः पंथाःस्रुघ्नदेशात्स्रुघ्नमुपतिष्ठते प्राप्नोतीत्यर्थः वालिप्सा
याम् प्रभुमुपतिष्ठते लिप्सयासमीपेगच्छतीत्यर्थः अकर्मकाच्च उपतिष्ठतेरकर्मकादात्मनेपदंस्या
त् भोजनकाले उपतिष्ठते संनिहितेभवतीत्यर्थः उद्विभ्यांतपोऽकर्मकात्स्वांगकर्मकाच्च स्वमंगं

२१

सांगंनत्वड्डवमिति परिभाषितं उत्तपते वित्तपते दीप्यते इत्यर्थः नेदृष्टवर्गामृघाति संतापय
ति विलापयति वेत्यर्थः चैत्रोमैत्रमपाणिमपति संतापयतीत्यर्थः आङोयमहतिभ्यो आङःप
राभ्यो मकर्मकाभ्यो स्वांगकर्मकाभ्यांवयमहनिभ्यामात् नेहपरस्यशिरः आहंति कथंतर्हि आ
जघ्नेविषमविलोचनस्यवक्षः इतिभारविः अदद्धेममरत्तुन्नममिति भट्टिश्चप्रमादपवादमिति सा
मीप्यमेतेस्मथाहारोवावाधः विषमविलोचनस्यसमीपमेसाचवस आजघ्नेस्वकीयमेववक्षोमहहृदेव
मर्थः हनः सिः कित हनः परः सिः प्रत्ययोवाकित्स्यात् हनोलिङ्लुङोरितिवधादेशः आवधिष्ट।
आवधिषातां पदेकित्वात् लोपश्चानुदात्ततनामितिलोपः लोपोऽकृत्स्यादितिसिलोपः आहसातां
आहसत यमः सूचनेसिः कित सूचनंपरदोषाविष्करणं कित्त्वालोपश्चनुदात्ततनामितिलोपः
लोपोऽकृत्स्यादितिसिः लोपः उदायत सूचनेकिं उपायंस्तवादमाकृष्टवानित्यर्थः समोगमृच्छि
प्रच्छिस्वरत्यर्तिश्रुविदिदृशिभ्यः समुपसर्गादकर्मकेभ्योगमृच्छ्यांतिश्रुदृशिभ्यः प्रच्छिस्वरतिविदि

भ्यः सकर्मकेभ्यस्त्वात संगच्छते संगते भवतीत्यर्थः गमेर्कस्मादीमिस्सेभ्याकितोवात्मनेपिदितिये
सिस्यैवाकितोस्तुः आशिषिलिङि॰ कितालोपत्वनुदात्तनामितिनलोपः संगसीष्ट लुङि॰
कितात्त्वलोपोऽरुस्वादितिसिलोपः समगत समगंसत कित्वाभावे समगंस्त समगंस्तातां
समगंसत नोदादिकस्य स्वछेरमग्रहणानत्वस्वछादेशस्येतिव्यननार्थः ल्टटः प्रेयागः स्मर
ल्विष्यते ग्रहामितिसंप्रसारे संपृच्छते स्पृशोद्यापतापयोः संस्मरते स्वतीतिभौवादिक ज्वेहामा
दिकयोर्ग्रहणे तत्रस्मादेशः समस्छते लिटि समारे समारते समारिरे लिङि॰ उरितिनगुणः
समरशीष्ट समर्ता हन्स्तउतोर समरिष्यते समारिष्यत लुङि॰ मेटउत्सडोभावः उरितिनगुणः
लोपोह्रस्वादितिसिलोपः मामस्मरत मासमरषातां मासमरषत माडभावे समार्त समार्षातां स
मार्षत उपतैस्तुस्मरप्रोरिः पर्वस्येति पर्वस्येते ग्रसवर्णास्वरेपर्वयोरितीश ससिष्टते लुङि॰ सर्तिशा
स्पर्तिभ्यउलिङः स्वर्णाहशोसितिगुणः मेटउत्सभावः मासमरत मासमरेतां मासमरंत माड॰

भावे समारत समसते श्रुवः स्थ्याद्देश स्थः तुपसमपश्च संस्थागते परस्मैपदमाहवर्ष्यात विदि
ज्ञाने समैवग्रहणं नवस्वरितेतोविज्ञत्वलाभे उपसमस्तनाविचारणार्थमपाविदेस्त्रत्तदातत्वादात्म।
नेपदं सिद्धमेवं वेत्तेरंतोरुट् विदः परस्मात पर्स्यपस्यरुट्वास्मात्तरपगादेरितिपथपः संपश्यते कथं
तर्हिसकर्मकस्यरवोसीतिप्रयोगापिसंस्थागते इतिमरारिप्रयोगः प्रामादिकः कथयश्चाउत्सव्थाह
गेवाहनिगम्यादीनां कथमकर्मकतेतिचेच्छ्रुणु धातोरर्थान्तरेवृत्तेर्धात्वर्थेनोपसंग्रहात् प्रसिद्धेरवि
वक्षातः कर्मणोऽकर्मिकाक्रिये सकतवादेकर्मकत्वेवोध्ये उपसर्गादस्यत्यूह्योर्वाअकर्मकादितिनि
वृत्ते अस्तवेपणि ऊहवितर्के वैधनिरस्यतिदिवादित्वाद्यः उपसर्गाहृहतेह्मेयोगोदोक्ति ब्रह्मस
म्यात अग्निंसमूह्यति निसमुपविभ्योह्वः एभ्यः परस्माह्वेञ आत स्यात स्पर्द्धायामाङः आङः
परस्माह्वेञ्ञ्यात पराभिभवेच्छास्पर्द्धातस्यामर्थे अप्रतिबंधोसादस्फीतताप्तक्रमः क्रचिक्रमतेबुद्धि
र्नप्रतिहन्यते इत्यर्थः अध्ययनायक्रमते उत्साहतेत्यर्थः क्रमंतेअस्मिन् शास्त्राणिस्फीतानिभवंतीत्य
र्थः

सा॰
३२

उपपराभ्यां अप्रतिबंधादिषु वाचेष्टाभ्यां क्रमआत्स्यात् नेहसंक्रामति आङ उद्गमेतिक्रमते ।
आक्रमते सूर्यउदयते इत्यर्थः वेः पादविहरणे विक्रमे वाजी पद्यपथं थान्त्रअस्मिन्नर्थेवप्रसिद्धत्व
थापि धातूनामनेकार्थत्वादेव मत्कंपादविहरणे किं विक्रामति संधिर्द्विधा भवति स्फुटी भवतीत्य
र्थः प्रोपाभ्यां आरंभार्थाभ्यां प्रक्रमते आरंभं करोतीत्यर्थः प्रोपारंभार्थाभ्यां किं प्रक्रामति गच्छतीत्य
र्थः उपक्रामति समागच्छतीत्यर्थः उपपराभ्यामित्येतेनात्मनेपदे शंकायां अप्रतिबंधादिषु वेत्युक्तत्वात् अ
नुपसर्गाद्वा अप्राप्तविभाषेयं अप्रतिबंधादिषु वृत्तिनियममेव अपङ्क्रमेतः अपलपनेर्थे ज्ञस्यात् अक
र्मकाच्च अनुपसर्गात् ज्ञः अकर्मकाच्चेत्येव सिद्धे सकर्मकार्थमारंभः अनुपसर्गात्किं स्वर्गलोके
न प्रजानाति कथं तर्हि इत्यत्र यः शैवमवालोचनो ततोऽम्भज स संगमनं मेनेतस्येति भट्टिः कर्मणि
लि कर्मणोऽविवक्षितत्वे परोक्षे विपरिणामः संप्रतिभ्यामनाध्याने उत्कंठापूर्वकं स्मरणमाध्यानं श
तं संजानीते अवेदते इत्यर्थः शतं प्रतिजानीते अंगीकरोतीत्यर्थः अनुपसर्गात् ज्ञः अनुपसर्गा

३२

ते नः अनुपसर्गात्परस्मज्ञो वा तस्मात् वेः शब्दकर्मणः कृञः शब्दे विकुरुते उच्चारयतीत्यर्थः शब्द
कर्मणः किं चित्तं विकरोति कामः अकर्मकाच्च वेरकर्मकात्कृञ आत् विकुर्वते सैन्धवाः वाजिनो
विकारं लभन्ते इत्यर्थः भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः वदतेरात्मादेष्वर्थेषु शा
स्त्रे वदते भासमानो ब्रवीतीत्यर्थः भृत्यानुपवदते सांत्वयतीत्यर्थः उपसंभाषा सांत्वने शास्त्रे वदते ज्ञा
ने वदते इत्यर्थः क्षेत्रे वदते प्रयत्ने वदते इत्यर्थः गेहे विवदते विवदं वदते इत्यर्थः उपवदते प्रार्थयते
उपमंत्रणमुपछंदते एषु किं किंचिद्वदति मनुष्यादीनां सहोच्चारणेर्थे संप्रवदंते ब्राह्मणाः संभू
योच्चारयन्तीत्यर्थः व्यक्तवागामिषयादनुर्स्वादकर्मकात् एतादृशा वदंते तस्मात् व्यक्तवाग्विषये
यस्य स व्यक्तवाग्विषयस्तस्मात् अनुवदते कठः कलापस्य वेदस्य वचनाद्वपि कठकलापशब्दावत्र
तदध्येतरि प्रवर्तते अनुसारश्येप कलापस्येति संबंधे षष्ठी अकर्मकात् किं उक्तमनुवदति व्यक्तवाग्
ति किं अनुवदति वीणा वाविकहेत्ताक्तो विकहाक्रिरूपे व्यक्तवाचां समुच्चारणे ऽर्थे वदेर्वात् अप्राप्त

सु॰
३८

विभाषेयं अवाद्ग्रिरतेगिरते रितितौदादिकस्यैवग्रहणं ग्रणातेस्तु पूर्वसूत्रप्रयोगो नास्तीति भाष्येके:
समः परिज्ञाने समो गिरते रातस्यात्प्रतिज्ञाने समो गिरतेरर्थे संगिरते प्रतिजानीते इत्यर्थः प्रतिज्ञाने।
किं संगिरति ग्रासं उदश्चरः सकर्मकात् धर्ममुच्चरते उल्लंघ्यगच्छतीत्यर्थः सकर्मकात्किं वाष्पमुच्चर
ति उपरिष्टाद्गच्छतीत्यर्थः समस्तृतीयायुक्तात् तृतीयांतयुक्तात्समश्चरेस्तस्मात् अश्वयानेपि रथेन स
ञ्चरते दाणश्च सा चेच्चतुर्थ्यर्थे तृतीयांतयुक्तात्संप्रोपपूर्वकात् दाणस्तस्मात् सा तृतीया चेत् चतुर्थ्यर्थे भव
ति दास्या संयच्छते दास्यै ददातीत्यर्थः दास्येति संप्रदाने तृतीया उपाद्यमः स्वीकारे उपाद्यमेस्तस्मा
त् स्वीकारो विवाहस्तस्मिन्नर्थे यमः सिकिद्वा यमेः परः सिच्प्रत्ययो वा कित्स्यात् विवाहेर्थे लोपस्त
नुदात्ततनामिति नलोपः उपायत साऽस्य हस्तं गमितानां सनप्रत्ययांतेभ्यः धातुभ्यस्तस्मात् अपकेवेत्त३।
सादिना न्यायातो: समो गमृच्छिभ्यां वात्मनेपदं कृतेनैनत: सनप्रत्यय: पूर्ववत् अपेनेन ।
तदात्मनेपदं सिद्धमेव पुनर्ग्रहणं विषयांतरे आत्मनेपदार्थं अनोर्ज्ञानातेर्न अनोः संज्ञानातेर्नात्स्या

रा

त् प्रत्याङ्भ्यां श्रुवः आश्रांससेतात शृणोतेर्नात स्वांघेतोपसर्गाद्युजेः स्वराद्यन्तोपसर्गाद्युजे
रात्मपात न यज्ञपात्रेष्वेव युञ्जते प्रयुङ्क्ते अयज्ञेति किं द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति समः क्ष्णुवः समः ।
क्ष्णोतेरात्मपात भुजोऽनपालने अभ्यवहारे इति व्याख्येये अपालने इति पर्युदासग्रहणं प्रयोजनत्वस्यार्थ
गोधारिकस्यैव भुज्येग्रहणमित्येकं अभ्यवहारादर्थान्तरे उपभोगादावप्यात्मनेपदं भवतीति द्वितीयार्थं निषे
धस्य निषेधः पर्युदासः भुजेरात्मपात पालने नात उपभोगार्थं तत्र हरीजनोद्धः स्वशक्तानि भुङ्क्ते ।
इतीह भुजेरुपभोगोऽर्थः उपभोग इत्युपलक्षणं तेन बुभुजे पृथिवीं भूपालः पृथिवीमेव केवलामि
त्यत्रात्मसात्करणमर्थः पृथिवीं बुभुजे स्वाधीनत्वकारोऽर्थः भुजः कौटिल्ये वदादेस्त्वयमेवपा
णिविभुजि अपालने किं महीं भुनक्ति दधि वेवि भोजनतात्पा प्रतारणोपरगामिफलार्थमित
मात्मनेपदे प्रतारणे किं स्थानेग्राहयति अम्याभिकालानुत्पादयति अर्हिबंचयति वर्जयतीत्यर्थः
अपहृदः अपाह्वदतेरात्मपात अनुपसर्गाद्ज्ञः सर्वेव्याख्याने कर्मव्यतिहारे धातोः क्रियाविनिम।

रेर्थेधातो कर्त्तर्यात्मनेपदं स्यात् व्यतिभवते अन्यस्ययोग्यं भवनमन्यतरः करोतीत्यर्थः गदाते व्यति
गते गतिहिंसार्थपठजल्पहसादिभ्योनेतरान्योन्यपरस्परोपपदा न गतिहिंसार्थेभ्यः पठजल्पहसतेभ्य
श्चेतरेतरान्योन्योपपदेभ्यश्च धातुभ्यः आत्मात उत्मात अनुपराभ्यांकृञः पं आत्मगामिफलेप
रस्मैपदार्थमिदं अभिप्रत्यतिभ्यः क्षिपः क्षिप प्रेरणे स्वरितेत्स्यात्मगामिफलेपि परस्मैपदार्थमिदं प्रा
द्वहः प्राद्वहतेरात्मात् अभिपत्याषेरात्मात् स्वरितेत्वात्तदद्वये प्राप्ते आरंभः पृषक्षामर्षणे दिवादिश्चु
रादिश्च परिमृष्यति परिमर्षयति जेरभावे परिमर्षति चकाराद्वहेरपि पं भवति परिवहति व्याङ् परिभ्यो।
भ्यः रमः स्यादेवमाख्यातमिदं अकर्मकाद्यमनेर्वाये स्यात् बुधयुधनशजनेङ् प्रुद्रुस्रुभ्यो ण्यन्तेभ्यः रमः
इङ् क्रीङ्जीनामित्यात्वे अध्यापयति शाययति प्रापयतीत्यर्थः स्नावयति स्यन्दयतीत्यर्थः इति पदव्य
वस्था ॥

अथभावकर्मणोर्लडादयः यक्चतङ्भुविकर्मणिइतिचाङ्गीत्यतोनुवृत्तं अव्यवहितम
पिकर्त्तरीतिनानुवर्त्तते उक्तंसूत्रेकर्त्तृग्रहणात् आख्यानप्रकरणादितश्चतङ्विधेयार्थ
तेषुचतत्रशब्दोस्तितेनभावार्थकेषुकर्मार्थकेषुचतङ्षुपरतोधातोर्यक्स्यात् आङ्गुविक
र्मणि भवनंभूःसंपदादित्वाद्भावेक्विप्तस्यांभुविसिद्धेधात्वर्थेसाध्यरूपेभावेसार्थइतिफ
लितं द्रव्यर्थोभावस्तुसिद्धरूपः उक्तंचक्रियायासिद्धतावस्थासाध्यावस्थाचाकोषि
तासिद्धताद्रव्यमिच्छंतितत्रैवेच्छंतिद्रव्यविधिं १ भावोभावनाउत्पादनाक्रियासाचसा
ध्यत्वेनसकलधातुवाच्यावर्त्तते उक्तंचव्यापारोभावनासैवोत्पादनासैवचक्रियेतेउत्प
तिरनुकूलोव्यापारइत्यर्थः तत्रसिद्धरूपोभावःकृतनादिवाच्यःस्यात्समस्तरूपमिष्टमेवो
ति उक्तंचभाष्यकृताकृदभिहितोभावोद्रव्यवत्प्रकाशतेइतिद्रव्यधर्मानलिंगसंख्या
कारकादीनरत्तातीत्यर्थः लिंगसंख्याकारकान्वितंद्रव्यमित्युक्तेः तेनपाकंपाकेनेत्या

स्त्र
५

दौहित्रीयादयः प्रवर्त्तन्ते साध्यरूपो भावस्त्वाख्यातवाच्यस्तस्यासत्वरूपत्वेन द्वित्वाद्यप्र
तीतेर्न द्विवचनादिः भाष्यन्त आस्यन्ते शय्यन्ते इत्यत्र भावेऽपि बहुवचनेन च कर्मण्येवार्थे
न प्रत्ययोस्ति निशीके धातुद्वयस्याप्यकर्मकत्वात् आस्यन्ते इत्यासिकाः शय्यन्ते इति
शायिकाः इत्यत्र धात्वर्थनिर्देशे ण्वुल्प्रत्ययः उष्ट्रासिका आस्यन्ते हतशायिकाः श
य्यन्ते इत्यत्र उष्ट्राणां याहशान्यासनानि हतानां याहशानि शयनानि ताहशानि देव
दत्तकर्तृकाण्यासनादीनीत्यर्थः फलाश्रयकर्मफलं च धात्वनेवोक्तमित्याश्रयमात्रमा
ख्यातार्थः अनन्यलभ्यत्वात् अकर्मकेभ्यो धातुभ्यो भावे आत्मकर्मकेभ्यः कर्मणि प्रा
प्त्यात् साध्यरूपस्य भावस्याख्यातेनैव संख्यानपेक्षत्वेन स्वस्यैकत्वादेकवचनमेव
तत्र प्रथमस्यैव न मध्यमोत्तमयोः युष्मदस्मदोराख्यातवाच्यकारकवाचित्वाभावा
त् नाम्नोप्याख्यातवाच्यकारकवाचित्वाभावस्तथापि प्रथमो भवति तस्मात्तिष्याद्दे

वचनाभावात् नैवैकवचनस्वीकारः प्रथमपुरुषमेंतताकथंभवेदित्यर्थः भावे
यथाभूयतेइत्यादि स्यंतानांहनग्रहदृशांचभावकर्मणोः सितासीस्यपासि
ष्टासइणवच्च स्यंतेभ्योहनिग्रहिदृशिभ्यश्चपरेषांभावेकर्मणिचार्थेस्थितानां
सितासीस्यपासिइडागमोवाभवतिसइटइणिवेतिइणवत् समस्यनाहनत्कार्या
तिदेशोयंइणिपरेयवृद्ध्यादिकार्यंभवति नतुइण्वदिटिपरेपीत्यर्थः यथाभा
विताभाविष्यतेइत्यादौवृद्धिः दापिता दापिष्यते इत्यादौयुकसिना उपधाया
वादीर्घइत्यादिज्ञातव्यकर्तरिकर्त्तुरन्याःकर्तातस्मिन्अकर्त्तरिभावेकर्मणिचा
र्थेतन्प्रत्ययेपरेधातोर्णास्यात् अकर्त्तरीतिकिं अहृततयंदकुलालः स्वपि
तितनोल्लक्षभावि अकर्मकोपिधातःक्वचिदर्थानेसकर्मकत्वभजति
धातूनामनेकार्थत्वेनार्थान्तरसोपसर्गेणद्योतनाद्गतोः यथाकर्मणपातस्वामि

स॰

धा॰

नास्त्येवमनुभूयते आत्मस्थान्क्रियतेऽन्यत्र्थः लज्जासत्तास्थितिजागरणवृ
द्धिक्षयभयजीवितमरणं शयनक्रीडारुचिदीप्त्यर्थं धातुगणनमकर्मकमाहुः
१ अकर्मकधातुलक्षणमाह आचार्यास्तु धातुगणमकर्मकमाहुः ब्रुवंति
न केलज्जासत्तास्थितिजागरणान्यर्थाः संति यस्य सलज्जासत्तास्थितिजागर
णं तु अत्रैको चेत्पुनः हृद्धिक्षयभयजीवितमरणान्यर्थाः संति यस्य सहृद्धि
क्षयभयजीवितमरणास्तु पुनः शयनक्रीडारुचिदीप्त्ययोऽर्थाः संति यस्य सश
यनक्रीडारुचिदीप्त्यर्थस्तु फलव्यापारयोरेकनिष्ठतायामकर्मकः धातुस्तु
योर्धर्मिभेदे सकर्मकमुदाहृतः २ सकर्मकाकर्मकलक्षणमाह आचार्यैर
कर्मको [illegible] धातुरुदाहृतः कथितः वा सत्यां उत्पत्तिनो फलो व्यापारो धातु
र्थः तत्रोत्पादना व्यापारः उत्पत्तिः फलं यथा पचेः फूत्कारणो योदकोपस्क

धातु

रणादिलक्षणोव्यापारः विक्लित्यादिफलं तयोः फलव्यापारयोरेकनिष्ठत्वे
याम् एकस्मिन्धर्मिण्याश्रयेस्थितौ सत्यामित्यर्थः धातुः अकर्मक उदाहृतः
द्वासति तयोः फलव्यापारयोर्द्धर्मयोर्धर्मिभेदे आश्रयभेदे सति एकस्मिन्ध
र्मिणि व्यापार इत्यर्थः धातुः सकर्मक उदाहृतः धातोरर्थान्तरे वृत्तेर्धात्वर्थेनो
पसंग्रहात् प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया १ क्वचित्सकर्मक
स्यापि धातोः क्रिया धात्वर्थोऽकर्मका कर्मरहिता भवतीत्यर्थः कस्मात् अन्यो
र्थ इत्यर्थान्तरं तस्मिन्वर्थान्तरे वृत्तेर्वर्तनाद्धेतोः यथा नदी वहति स्यन्दते इत्यर्थः पुन
र्धात्वर्थेन कर्मणः उपसंग्रहाद्धेतोः यथा जीवति प्राणान् बिभर्तीत्यर्थः पुनः कर्म
णामप्रसिद्धेर्हेतोः यथा मेघो वर्षति जलमिति कर्म प्रसिद्धमेव पुनः कर्मणोऽविवक्षा
तो वक्तुमिच्छाया अभावाद्धेतोः यथा यो हितावसंस्पष्टएते सकिंप्रभुः क्लान्तिनः

स्त॰
८५

प्रभृतीत्यर्थः वचनमितिकर्म्मणिविवक्षितमत्रघीडिः यङ्‌यङ्‌ह्निनिषेधेनेयङ्‌आदेशः
स्यानोकितिङि निचयप्रत्ययेपरेङित्वादन्यादेशः यतश्चल्लोपः शाय्यतेनुयातेणि
तियः चिशेयशणवड्डावाहाहृहिः पापीषिषष्टकर्म्मणिपानडरिनिनगुणः क्षषिष्ठ्य
चौरादिकान् ण्यन्तात् भावयनेः कर्म्मणिपानजेरितिणिलोपः भाव्यते शणवदिटि
त्रेल्लोपेवासान् शणवदिटिपरेणिलोपेभाविताएवेतिसिसते । तीटिच भावयिता
सप्रत्ययान्ताद्बुभूषतेर्भावेश्रान् यतश्चल्लोपः बुभूष्यते यङ्‌प्रत्ययान्तान्नय
तश्चल्लोपे वोभूयते यङ्‌लुङन्ताद्भावेश्रान् वोभूयते स्तौतेः कर्म्मणिपानेयेहेइति
दीर्घः स्तूयते ऋगतौकर्म्मणिपान् गुणोर्त्तीतिगुणः अर्य्यते शणवदिटित्वयानोर्नी
मिनइलिहृङिः आरिता स्मर्त्तितायाशगुणोर्त्तीतिगुणः स्मर्य्यते यजतेः कर्म्मणिपा
न् यजामितिसंप्रसारणं इज्यनेलिटि ईजे आशिषिलिङि शणवदिटियक्षीष्ट

तनोतेर्वा यकि तनेराकारांत आदेशो वा स्यात् यकि परे जनेर्वा यकि जनेराकारो।
तादेशो वा स्यात् यकि परे तपो नेणा कर्मकर्तर्यनुतापे च तपेर्णप्रत्ययो न स्या
त् अनुतापेर्थे कर्मकर्तर्यर्थे च अन्वतप्त देवदत्तः यापेन कर्त्ताभ्याहृत इत्यर्थः
भावे निर्देशोयं पापेन पापवता पुंसा विचार्य कृत्वा पश्चादशोचि इत्यर्थः कर्म
कर्मकर्तरि तु अन्वतप्त तापसः तप्यत तपस्तपः कर्मस्यान्येन न कर्तुः कर्म
वद्भावः इट्स्नद्रोनदादेरिति तालये इति दीर्घः दीयते आतो न पित्यालोप
देश्चातो युक् आदेन स्यात् आतो युक् स्यात् इणि प्रत्यये ञ्णिति णिति कृत्य
न्ये च परे ह्वानेदाधः इणि दायकः इणि वादेदिदायि धोइट् इणि वादेदो।
भावे अपि हाधा स्यामीति ते आदि चातोण्व था स्या थातन् ने स्व हृद्धनेपरे एव
दिदियुक् अगत्लायि धाता हेन कर्मणि पात् हर्वा हन्तेरिति ञ्चः जघ्ने हनोऽत् ड.

सा॰
४३

लिङोरितिवावधः यनइत्यलोपः वधिषीष्ट पक्षेहनोघ्नेइतिघः अतउपधाया
इतिवृद्धिः हनोघदित्यनेननघनादेशानइमवर्जितेइत्युक्तत्वात् घानीषीष्ट इण
वडोवावधादेशस्यबाधकोज्ञेयः हन्तउतोट् हनिष्यते लुङि॰ इणाङ्दिङभावेहनः
सि॰ किदितिकित्वात् लोपस्तुउदात्ततनामितिनलोपः अहसातां गस्लातेः
कर्मणपात् ग्रहामितिसंप्रसारणं गस्वतेइणवदिटोनदीर्घः इटोग्रहामितिसूत्रे
णसिसेतन्यादिलक्षणेनविधीयमानस्यैवेटोदीर्घोभवति नेणवदिटइत्यर्थः हृ
षेः कर्मणपात्लुङि॰ इणवदिटिपरेउपधायाइतिगुणः अदर्शिषातां पक्षेहृश
षेतिषत्वेषढोरितिकः हशाषातादीतिसकृत्वननन्तवृहशेरित्युक्तत्वात् सिस्योरि
तिनगुणः अदृक्षातां शमेभावेण्यादकर्मकत्वात्मांतस्यसेटोनवृद्धिरितिणित्वा
निवृत्तिचनन्तवाचमिकमिवमिनांसेटोमातस्यथानोवृद्धिर्नस्यात्इणाण्णितिगा

निष्कान्तस्येचपरेष्याचमिकमिवमीनांनवृद्धिर्भवतीत्यर्थः शमिशमःदमःउ
णिशामकः दमकः कथंनहिहोरपिदकामिपदेककेनखमितिश्रीहर्षप्रयोगउ
निचेडश्चनेनिहृतप्रेषणाद्धातोः प्राकृतेनैषणीविध्यतेअतप्राकृतेनञिलनउ
णोवोध्यः सेटः किंश्रगामिकमुकोतेनाकमेस्वार्थेणिङिणितिङ वाजेरिति
ञिलोपः काम्यतेलङि णिङ भावस्यकामिणिणिङोणिंवभ्यतात् शमेकर्म
कर्मण्यात्नेरितिञिलोपः हृदिश्रवा शामिता शमिता पक्षेमिमेनेतीटिउ
णः शमयिता यडंतश्चकानिकम्यंतात् शंशमे: कर्मण्यात् नञोयरेतोः नपिच
हसादितियलोपः यतइत्यलोपः नेनोयकिचेरितिञिलोपः शाशम्यतेलङि
शंशामिता शाशमिता शंशमयितालुङि अशंशामि अशंशमिणम्यय
येतशंशामि शंशमे वधहिंसायांहृस्मोतः भेजेरिणोनलोपोवा भेजास्या

सा॰
४४

मर्द्दने इन्यस्य नस्य लोपो वा स्यात् इणि प्रत्यये परे लभेरिस्ममोऽडम्वा डलभषप्राप्ता
विन्यस्य डमागमो वा स्यात् इणि प्रत्यये णमि प्रत्यये च परे प्रादेर्नित्यं डम प्र
वेस्य लभेर्नित्यं डम स्यात् णमि प्रत्यये प्रलंभं अथ ये द्विकर्मका धातवस्तेभ्य आ
त कृत्यक्तखलर्थप्रत्ययाः किं मुख्ये कर्मणि उत गौणे किं वा उभयोरिति संदेहे
व्यवस्थामाह गौणकर्मणि दुह्यादेः प्रधाने नीहृकृष्वहां बुद्धिभक्षार्थयोः
शब्दकर्मकाणां निजेच्छयान्यतरयोः शब्दकर्मकस्यैतानां प्रयोज्यप्रधानयोरन्य
तरकर्मणि निजेच्छया लादयो मताः अन्येषां ण्यन्तानां तु प्रयोज्यकर्मणि लाद
यो मताः कारके गतिबुद्धीत्यनेन कर्त्तृयत्कर्मकारकं कृतं तत्प्रयोज्यकर्मज्ञात
व्यं लादय इत्यत्रादिशब्देन कृत्यक्तखलर्थाः प्रत्यया ग्राह्याः दुह्यादेर्गौणे कर्म
णि पाठात् वदाहरणमाह गौर्दुह्यते पयः इत्यत्र गौरिति गौणकर्मत्वाख्यातेनो।

कृत्वादन्योक्तेइत्यनेनप्रथमापयइतिनमुख्यकर्मत्वंनत्वकर्माणिद्वितीया कर्त
रिवत्तृक्तत्वात् तृतीयादेवदत्तेनेतिन्यादीनांप्रधानकर्मणपात् उदाहरणमा
ह अजायामंनीयते इत्यत्राजेतिमुख्यकर्मत्वोक्तत्वात् प्रथमायामिति
गौणकर्मकर्त्तान्तृतीयांतोध्याहार्यः बुद्धिभक्षार्थयोः णिहृकर्मकाणांच
ज्यंतानांप्रयोज्यंमुख्यंचकर्मणपात् उदाहरणमाह बोध्यतेमाणवकंधर्म
इत्यत्रधर्मइति मुख्यंकर्ममाणवकमितिप्रयोज्यकर्मत्वंनिजेछयाध्या
तादिः कर्त्तव्यः भोज्यतेमाणकमोदनइत्यत्रोदनइतिमुख्यकर्ममाणवकमि
तिप्रयोज्यकर्मत्वंनिजेछयाध्यातादिः पाठ्यतेमाणकंवेदाइत्यत्रवेदइति
मुख्यकर्ममाणवकमितिप्रयोज्यकर्मत्वंनिजेछयाध्यातादिः तृतीयांतः
कर्त्ताध्याहार्यः ज्यंतस्यप्रयोज्यकर्मणपात् उदाहरणमाह देवदत्तोग्रामंग

स
४५

म्यते इत्यत्र ग्राममिति मुख्यकर्मदेवदत्त इति प्रयोज्यकर्मतत्राख्यातादिः कर्म
णा उक्तत्वात् प्रथमा कर्त्तरि तृतीयान्तः ध्याहार्यः अकर्मकाणां कालादिक
र्मकाणां कर्मणि भावे च लकारः कालादिकर्मकाद्धातोर्भावकर्मणात् उदाह
रणमाह मासमास्यते इत्यत्र कालवाचिकर्मणआख्यातेनोक्तत्वात् प्रथमा कर्त्ता
न्तृतीयान्तोऽध्याहार्यः भावे तु मासमास्यते देवदत्तेन अत्र कर्मणोऽनुक्तत्वान्मा
समिति द्वितीया कर्त्तुरनुक्तत्वात् देवदत्तेनेति कर्त्तरि तृतीया अन्यत्र न कालादिकर्म
काद्धातोरन्यप्रयोज्यकर्मण्यपवादाख्यातादिः मासमास्यते माणवकः इत्यत्र कालवाचि
कर्मणो न्मासमिति द्वितीया माणवक इति प्रयोज्यकर्मतत्राख्यातेनोक्तत्वात् प्रथ
मा कर्त्तरि त्वनुक्तत्वात् तृतीया देवदत्तेनेति इति भावकर्मप्रक्रिया सलकारकाणाम
वांनरव्यापारो वर्त्तते न तु स्वव्यापारे स्वातंत्र्यत्वात् व्यापारहीनस्याकारकत्वात्

व्यापारभेदात्कारकान्तरायां करणादिसंभवः तत्र यदा कारकान्तराणां सौकर्यातिशयं द्यो
तयितुं प्रतिपादयितुं कर्तृव्यापारो विवक्तो नेष्यति तदा कारकान्तराण्यपि कर्तृसंज्ञा।
प्राप्नुवंति स्वव्यापारे स्वतंत्रत्वात् सुष्ठु करोतीति सुकरः तस्य भावः सौकर्यं एवं
कारकान्तराणां पूर्वं करणत्वादि सत्त्वेपि सांप्रतं कर्तृसंज्ञा करणात् कर्तृख्यात्या ख्यातो
भवति साध्वसिश्छिनत्तीत्यत्र करणस्य कर्तृसंज्ञा कर्तृर्याख्यानेनोक्तत्वात् असिरि
त्यत्र प्रथमा काष्ठानि पचंतीत्यत्रापि करणस्य कर्तृसंज्ञा कर्तृर्याख्यानेनोक्तत्वात्
स्थालीतिउक्ते प्रथमा कर्मणस्तु कर्तृत्वविवक्षायां प्राक् सकर्मका अपि प्रयोगाः क
र्मकाकर्मिणः सौकर्यातिशयं द्योतयितुं यदा कर्तृत्वविवक्षातः प्राक् सकर्मका भवं
तिशयेन प्रायेणास्तुक्तत्वादेककर्मकाः छिदिभिदिप्रभृतयस्त्वकर्मका भवंति
न तु द्विकर्मकाः अकर्मकस्य फलमाह तेभ्यो भावकर्मणि च लकाराः कर्मकर्त्तर

5 पिघातवो कर माक

म०
४९

कर्मकाद्धातोर्भावेकर्त्तरिचार्थेआख्यातप्रत्ययोभवतिभावे आख्यातस्योदाहरणं प
च्यतेओदनेनभिद्यतेकाष्ठेनेत्यत्रकर्मणः कर्त्तृसंज्ञा आख्यातस्तुभावे कर्त्तर्यकर्मकाच्चा
त्‌ ओदनेनेत्यादौतृतीयाकर्मकर्त्तर्याख्यातस्योदाहरणमाह कर्मवत्कर्मणातुल्य
क्रियः कर्मस्थयाक्रिययातुल्यक्रियः कर्त्ताकर्मवद्भवतिकार्यातिदेशोयंकर्मणो
यत्कार्यंभवति तत्कर्मकर्त्तर्यपीत्यर्थः तेनयककृत्वनाशिषितियक् आड्वीत्यात्
इणूतनीतिइणस्वरांतानामितोणवदिट् इत्यादि कार्याणिकर्मकर्त्तरिभवंति काष्ठं
भिनत्तीत्यत्रकाष्ठस्यविदारणाश्रयत्वरूपाक्रियासैवकाष्ठंभिद्यतेस्वयमेवेत्यत्र
तस्मिन्कर्त्तर्यपिभवति अयंकार्यातिदेशः कर्मस्थभावकानांकर्मस्थक्रिया
णांचधातूनांभवति नतुकर्त्तृस्थभावकानांकर्त्तृस्थक्रियाणांचधातूनांभवतिय
त्रकर्मणिदृष्टेक्रियाउमातुनपावसानेकर्मस्थक्रियाः ततोऽन्येकर्त्तृस्थाक्रियाः पक्के

षुतंडुलेषुभिन्नेषुकाष्ठेषुदृष्टेषुदृष्टः कर्तृव्यापारोऽनुमीयतेतेनतदुक्तंकर्मस्थपचतेर्भा
वःकर्मस्थाचभिदेःक्रिया १ यद्यप्याथाभावयोरित्यत्रभावशब्देनक्रियापिगृह्यते
तथाप्यत्रभेदोविवक्षितःपृथगुपादानात् परिस्पंदरूपोधात्वर्थःछिदादिःक्रिया
अपरिस्पंदरूपोविक्लित्त्यादिर्भावः पचत्योदनंभिनत्तिकाष्ठंदेवदत्तःपच्यतेओदनः
भिद्यतेकाष्ठंस्वयमेवत्याख्यातेनकर्मकर्तृत्वोक्तत्वात्प्रथमाकर्तृस्थक्रियायाउदा
हरणमाह आशास्तेघटंदेवदत्तः आशास्तेघटःस्वयमेवगच्छतिग्रामंदेवदत्तः
गच्छतिग्रामःस्वयमेवेत्यत्रघटग्रामयोर्दृष्टयोर्नहिदेवदत्तस्यव्यापारोऽनुमातुंशक्य
ते इतिकर्तृस्थक्रियायाहेतोः द्विकर्मकाणांनद्विकर्मकधातूनांकर्मकर्ताकर्मव
द्भवति अजांग्रामंनयतीत्यत्रप्रधानकर्मणःकर्तृसंज्ञाप्रधानेनीहृकृष्वहामि
त्युक्तत्वात् १ आख्यातेनोक्तत्वात्प्रथमाइहप्रतिषेधाभावयक्क्रियाफलस्यात्म

गामित्येष्यात्मनेपदं च समानऽत्यर्थः इह्निपच्योः सकर्मयोर्वा अनयोः कर्मकर्त्तरिकर्मव
द्वाङ्भवति इह स्नुनमां कर्मकर्त्तरियगिणौ न एभ्यो यगिणौ प्रत्ययौ न भवतः कर्मकर्त्त
र्यर्थे इह नेनेन यक् निषिध्यते इणा तु विकल्पेन वक्ष्यते गोः पयोदुग्धे इत्यत्र गौणात्कर्मणः
कर्तृविवक्षा गौणात्कर्मणा दुह्यादेरित्युक्तत्वात् स्वरांतानां कर्मकर्त्तरीण्वा ततिस्वरां
तेभ्यो धातुभ्य इणप्रत्ययो वा भवति कर्मकर्त्तर्यर्थे ततिनिपरे स्वरान्तानां किं अभेदि
काष्ठं कर्मकर्त्तरि किं अकारिकटः कुलालेन कर्मकर्त्तरि लुङ् यथा अकारि कटः स्व
यमेवपत्तेलोपोऽस्यादिति सिलोपः अहृतनडह्श्रेतिडुह्शेरिणप्रत्ययो वा भवति क
र्मकर्त्तर्यर्थे ततिनिपरे कर्मकर्त्तरि किं अदोहि गौर्देवदत्तेन कर्मकर्त्तरि लुङ् यथा इणप्रत्य
ये अदोहि पयः दुह् घा घातादिति सक् इह दिह लिह गुह भ्य इति सको वा लुक् अधुक्षत
पयः स्वयमादिसिलोपः अयुग्य फलं पच्यते उदुंबरः इत्यत्र गौणात्कर्मणा उदुंबरस्य

कर्त्तृसंज्ञायोगेणौकर्मणिण्यादेरित्युक्तत्वात्तत्रकर्मवद्भावस्तेनयगादिचिणचिणवदिटोभवंति
स्नुप्रस्नवतोपस्नवणमुत्कंठावत्सोगांप्रस्नौति उत्कंठयति गोः कर्मणः कर्तृत्वावि
वक्षायांप्रस्नुतेगौः लुङि स्वरांतानांहनग्रहदृशांणावदिट्प्राप्तात्प्राविश पक्षेस्नुकमो
रितिनेट्प्राप्तोऽपि नमतेदंडःस्वयमेवकर्मणः कर्तृसंज्ञाव्याख्यातेनोक्तत्वात् प्रथमा
लुङि अनंसतस्वयमेवकर्मकर्तर्यात्मनेपदमेवनान्ते सृजेः श्रद्धोपपन्नेकर्तर्येव स
कर्मकस्यसृजेः कर्त्ताकर्मवद्भवति श्रद्धायुक्तेकर्तर्यपिचौसृज्यतेस्रजंभक्तः।
न्यत्रकर्तरिव्याख्यानकर्तुः कर्मवद्भावात् आत्मनेपदंभवति श्रद्धयानिष्पाद
यतीत्यर्थः युजेर्वासकर्मकस्ययुजेः कर्त्ताकर्मवद्भावाद्भवति युज्यतेयोगंब्रह्म
चारीत्यत्रकर्तरिव्याख्यातः कर्तुः कर्मवद्भावादायगिणः नपस्तपःकर्मकस्य
तेपः [illegible]कर्मकर्मवद्भवति तप्यतेतपस्तापसइत्यत्रकर्तर्याख्यातः कर्तृत्कर्मवद्भा

सु.
५८

वाद्यात्मनेपदादिः अर्जयतीत्यर्थः लुङि तयोनेणिरयनेनेणः अतम भूषावाविनां
किरादीनांसातानांचयणिणाइएवदिटोन भूषाद्युभ्यः किरादिभ्यः सप्रत्ययोते
भ्यश्चयातभ्यश्चकर्मकर्त्तरियणिणाइएवदिटोनभवंति आत्मनेपदमेवभवती
त्यर्थः तदाद्यंतगिणाः किरादिः हृविन्दोपदणिगारणोहृडु आयोरेधूडः अनवस्था
नेप्रकृत्यापायामिनिपंचकः अलंकृतकन्यास्वकर्मणाः कर्तृसंज्ञा आख्या
तेनोक्तत्वात्रश्रयथमाएवमन्यत्रपितेयन्तदादिनिः ऋतइतीरु अवकिरेतलुङि
धृङ धृञ ऋदंतात्सिस्योरितिवेट् अवाकरिष्टइङभावेउरितिगुणेन ऋतइतोरपु
नः सिस्योरितिगुणेन अवाकरिष्टहृड तदादिगिन्यप्रत्ययेअपकीर्तिरिङ मतोज्ञेया
नोगितीयुआद्रियतेलुङि उरितिगुणेनलोपोहृस्वादितिसिलोपः अहृत एवंधृ
ङ तदादीत्यप्रत्ययेयहामिनिसंप्रसारणप्रकृतिलुङि कृशाषेतिषत्वस्मादि

वृङ वृञ ऋदंतान्नामितिवाटीका

तिसिलोपः अअष्ट चिकीर्षितेकटइत्यत्रकर्मणः कर्तृसंज्ञाआख्यातेनोक्तत्वात्प्रथ
मा लुङ् सिसतेवोट् यतइत्यलोपः अचिकीर्षीष्ट णिश्रिद्रुस्रु अयियअयादक
र्मकाण्णावणौणिन् णिश्रन्यांतेभ्यः श्रिद्रुस्रु अयियअयिभ्यः आत्मनेपद्विधाय
काकर्मकेभ्यश्चयातुभ्यायणौणिन भवन्तः केमकर्तरि अर्थे आदिएवदिष्टोभवनत्
त्यर्थः कारयतेघटइत्यत्र अण्यन्तात्कर्मकर्तर्याख्यातः नेत्राक्तत्वात्प्रथमा लुङ् अङि
त्यङ् द्वित्वअडि लघावित्युपधाह्रस्वपूर्वस्यकारश्चलघोरितिपूर्वदीर्घः अनेरिति
णिलोपः अचीकरत् उत्कुय्यतेदंडइत्यत्रकर्मकर्तर्याख्यातः अण्कर्मणीत्यण् लुङ्
श्रिद्रुडभ्यइतिङ् द्वित्वउधातोरितीय उदाबिश्रियत ब्रूतेकथेत्यत्रकर्मणः क
र्तृसंज्ञाआख्यातेनोक्तत्वात्प्रथमा लुङ् ब्रुवोनपीतिवच अस्यतिवक्तीतिङः
ङ् वचेरित्युमागमः अवोचत अयियअयाः चौरादिकयोर्भावपदेश्रयेणयते।

आत्माभवान

सु॰
५५

ग्रंथ इत्यत्र कर्मणः कर्तृविवक्षान आख्यातेनोक्तत्वात्प्रथमात्लुङि॰ अग्रंथिष्ट अग्रं
थिष्ट क्रैयादिकयोस्त अग्रंथीत ग्रंथीतेच मेखलास्वयमेव आत्मनेपदविधेयोः कर्म
कर्तृत्वमुदाहरंति विकुर्वते सैंधवाः इत्यत्राकर्मकाच्चेत्यनेनाविधानं आख्यातेनोक्त तत्वात्
ग्रंथ इत्यत्र कर्मणः कर्तृविवक्षान आख्यातेनोक्तत्वात्प्रथमात्लुङि॰ अग्रंथिष्ट अग्रंथि चलंतीत्यर्थः
ष्ट क्रैयादिकयोस्त अग्रंथीतेच मेखलास्वयमेव आत्मनेपदविधेयोः कर्मकर्तृत्वमुदा
हरंति विकुर्वते सैंधवाः इत्यत्राकर्मकाच्चेत्यनेनाविधानं आख्यातेनोक्तत्वात् कर्मकर्तृ
रि प्रथमा चलंतीत्यर्थः लुङि॰ इएवदिटि अकारिष्ट अकारिषातां अकारिषत इएव
दिटभावे लोहस्वादिति सिलोपः अकृत ॥ अकृषातां अकृषत कृषिरंजोः कर्मक
र्तरिवादिवादेः कृषिरंजिभ्यामुभयपदं भवति ॥ कर्मकर्तर्येवेति वादिवचनद्वये परतः
अनपित्वात्मनेपदमेव भवति कृषनिष्कर्षे ॥ क्रैयादिकः रंजरागे दैवादिकः कृष्यति

ऽप्यात्मनेपदादृश्यत्र कर्मणः कर्तृविवक्षायामाख्यातः कर्तुः कर्मवद्भावादात्मनेपदा
दिः लुङि ऽगात नीतो ऽ अकारि दृश्यते ऽश्यते वावसुमित्यत्रापि कर्मकर्तृषाख्या
तः तत्राख्यातेनोक्तत्वान्नप्रथमा लुङि अरंजि अरक्षाना अरंजत इह कर्मकर्तरि
प्रकरणेऽभिधीयते काष्ठं स्वयमेव त्याहो सर्वत्र स्वयं शब्दः कारणार्थको ऽत्रेयः आत्म
नाकरणेऽस्यार्थः कर्तर्ययेन कर्मणाख्यातः ॥ इति कर्मकर्तृप्रक्रिया ॥ स्वादित्यर्थः
स्मेति वाचिन्युपपदे भूतानद्यतने धातोर्लट् धातोर्लट् भवति स्मेति वाचिके श
ब्दे उपपदे सति न तु लङ् वयं वसामः अवसाम इत्यर्थः एवं ब्रूमेत्येवं तद्यसे इत्या
दिप्रयोगेष्विपयोगे उक्तेन स्मेति वाचिकशब्दे उपपदे सत्यपि यदशब्दयोगे भूतानद्य
तने लट् न भवति किं तु लङेव उत्तमपुरुषेचितविक्षेपादिनाय्यतेऽत्यर्थमरयसमा॥
दिभिः कश्चित्स्थानगते भवन वेत्ति यच्चात्रेभ्यः अन्नामंगुक्तेकिलशब्दो ऽत्रानस्

स्व
५०

चक्रुः सुप्तः सन् अहं विललापेति अत्यंतापह्नवे लिट् अत्यंतापलापार्थे लिट् भवति
कलिंगेनाम निषिद्धो देशः उक्तंच अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च तीर्थयात्रां
विनागत्वा पुनः संस्कारमर्हतीति १ केनचित्कश्चित्पृष्टः त्वं कलिंगेषु अवात्सीः त्व
त्र गत्वान्वयाश्चिरं स्थितमित्यथवतः सआह नाहं कलिंगान् जगामेति केवलमवस्थान
मेव न निषिध्यते किंतु तद्देशं भूते गमनमपीत्यंतापलापो भवति हशश्वतोर्लङ् लि
टौ ह शश्वत् निपातयोगे लङ्अर्थे लङ् लिटौ भवतः आसन्नकालेके भूतानद्यतन
परोक्षे ह निपातेर्थे प्रष्टव्ये लङ् लिटौ भवतः पंचवर्षाभ्यंतरः आसन्नकालः पंचवर्षा
तीतो विप्रकृष्टकालः पृच्छ्यमाने किंनगादेवं लिडेव अनासन्ने तु किं संजग्राह वि
स्मे लट् स्मयोगे लट् भवति न तु लिट् स्मत्ययं भूतकालद्योतके भूतानद्यतने ल
ङ् स्मयोगे लङोपवादः ब्रवीति स्म अब्रवीदित्यर्थः ननौ पृष्टप्रतिवचने भूते लट् पृ

ष्ठ्यानेस्मइतिपृष्टः कर्मणिक्तः पृष्टस्यप्रतिवचनंमितिषष्ठीसमासः भावेक्तप्रत्ययेन
पृष्टंप्रश्नंपृष्टपूर्वंवचनंप्रतिवचनंचपृष्टप्रतिवचनमितिमध्यमपदलोपीसमासः
ननुकरोमि अकार्षमित्यर्थः नन्वोर्वा ननुनिपातयोर्योगेपृष्टप्रतिवचनेभूते
वालट्भवतिपक्षेलुङ्. पुराशब्दयोगेभूतानद्यतनेवालुङ्. लटोनन्वस्म पक्षेलङ्लि
टोस्मेइतिकिंयजतिस्मयुधिष्ठिरः यावत्पुरानिपातयोर्भविष्यतिलट् यावद्भुंक्तेपुरा
भुंक्तेनिश्चितंभोक्ष्यतेइत्यर्थः निपातावेतौनिश्चयंद्योतयतः निपातयोःकिं याव
द्दास्यतेतावद्भोक्ष्यतेकरणभूतयाशुतायास्यविवर्तमानसमीपेभूतेभविष्यतिचवर्त।
मानवद्वा कदागतोसीतिभूतकालेप्रश्नवाक्ये अयमागच्छामीत्युत्तरं भूतका
लाभिव्यक्तयेयमितिप्रयोगास्त्विदानीमेवा उदगानमितिवर्तमानसमीपभूतकाल
द्योतनायतेनसागमनाभूतरूपयलिधस्मरनाप्रवेदादिपुरुकेनत्वानिनिर्दिष्टपते प

सु॰

५१

वेंकटागमिष्यतीति भविष्यत्काले प्रश्नवाक्यं एष गच्छामीत्युत्तरं भविष्यत्कालाभिव्यक्त
ये एष इति प्रयोगस्तु इदानीमेव गमिष्यामीति वर्तमानसामीप्ये भविष्यत्काले योनेना
यनेन हि गमनेनाऽविनाभूतेन यदुपरिकालं वेंकटादि गुणेन वक्ष्यति निर्दिश्यते तेन तत्र कदेति प्र
श्नोत्तरवाक्ययोः कालानुपादानात् अयमेव शाब्दार्थाप्तिमिदानीमिति कालावगमः
इति प्रवचनेन लट्प्रवचनग्रहणात्स्वरूपनिरासार्थं इति प्रपर्यायेष्वप्युपपदे लृङ् गर्हायां।
लृङ् गर्हायां लङ् अपिजात्वोः कालत्रये ऽपि आभ्यां योगे लङ् स्यात् गर्हायां कालत्रये परत्वात्
लुङादीन् बाधते अपि जायां त्यजसि अत्याक्षीः इत्यादि विषये त्यजसीत्यादि लडेव
प्रयुज्यते इति भावः एवं जायां अत्यजत् तत्याज त्यक्ष्यति अत्याक्षीत् इत्यादि विषये यो
जायामपि त्यजतीति जात्वगणिकामादत्से गर्हितमेतत् वाक्यमिति लिङ् लटौ
गर्हायां कालत्रये परे लङ् लिट् लृट् लुट् लङ् लुङ् भूतानद्यतने लुङ् कथं धर्मं त्यजः

परोक्षानद्यतनेभूतेलिट् कथंन्यक्ष भविष्यत्यनद्यतनेलुङ्. कथंधर्मंत्यक्तोसिभ
विष्यत्सामान्येलृट् कथंधर्मंत्यक्तासिभूतसामान्येलुङ्. कथंधर्मममस्यादेतोः जातुयदा
यत्रयदियोगेलिङ्. अनवक्लृप्त्यमर्षयोर्लिङ्. स्यात् यत्वायोगेअनवक्लृप्तिरसंभाव
नाअमर्षोअक्षमा लृटोपवादः लुङ्. नक्रियानिष्पत्तौ भूतेवाभविष्यतिवानित्यमि
त्यर्थः जातुभवान्हरिंनिंदिष्यदिंत्याद्युदाहर्तव्यं अगर्हायामिदं गर्हायांतुजातु
योगेलङ्क्तः उतायोर्वाढार्थयोर्लिङ्. समर्थार्थयोरनेयायोगेलिङ्. वाढार्थयोः
किं उतदेङ्ः पतिष्यति अपिधास्यतिद्वारंअत्रप्रश्नः प्रच्छादनंचगम्यते स्वाभिप्रा
याविष्करणेगम्येलिङ्. नतुकच्चिति कालत्रयेसर्वलकारापवादः कच्चितिकिं
कामोमेकच्चिजीवति वर्तमानसमीपेइतिलट्हेतुपतोभविष्यतिलिङ्. वाहेतु
कारणेहेतुमतफलपदेलृट् क्रुस्तनमेवेत्त्वंवियायात् क्रुस्तनलिः स्वस्वयामे

सु॰
५२

हेतुर्भविष्यमेवेष्यनेनेदहंतीत्तिपलायते इच्छार्थेषुलिङ्‌लोटौ कामइच्छाप्रवेद
नेप्रकाशनेनतस्मिन्नर्थे इच्छार्थेभ्यो लिङ्‌लोटौ इच्छार्थ्योयेषांते इच्छार्थाल्लभ्याः ते
नवचाकालाविल्वादयोपीच्छार्थाग्राह्याः पुनः पुनर्भ्यशार्थेत्वधातोर्लोटः स
र्वलकारविषये लोटोहिस्वौ सर्वतवादिविषयेतध्वमौ विषयेवा पुनः पुनर्भ
शार्थश्च धातोर्वाच्यश्च लोटद्योतक इति भावः ननुतवादीनामादेशा
वे पितांस्थाने विहितस्य हेः स्थानेवद्भावेन पित्वात् ङित्वंपि न्नापिच्च ङि
देति भाष्योक्तत्वात् ङित्वाभावस्तु नीहीत्यत्र ईहसेदनीत्वनस्यात् अहीत्यत्र अवादी
दीप्यितीपरत्ययेत्र वीदोइतिचस्यात् तुणादिइत्यत्र नहोनमिक्ते इमागमः पि
तीति इमागमे तृणेढिस्यात् अतोलोटोहिस्वाविन्नुक्तेसकलपुरुषवचनविष
येपरस्मैपदेभ्योहिः कर्त्तरिआत्मनेपदेभ्यः स्वाभावकर्मकर्त्तरिष क्रियासमभिहा

रेद्धेरिति द्विर्वचनं यस्माद्धातोर्लोड्विहितस्तस्यैव धातोरनुप्रयोगश्च कर्त्तव्यः अनुप्रयो
गाद्यथाययं लङादयः तिबादयश्च कर्त्तव्यास्ततः संख्याकालयोः पुरुषविशेषस्य चा
भिव्यक्तिर्भवति अत्र लोडन्तविषये संख्याकारकादीनां हि स्वाभावात् प्रतीतिस्तद्द्यो
धनाय धात्वनुप्रयोगो न्याय्य एव याहि याहीति याति पुनः पुनरतिशयेन वा यात्वहिय
त्ययान्तस्यार्थ एककर्तृकं वर्तमानयानयातिरन्यस्यार्थः उतिपाहत्वभेदान्वयेता
न्वयं याहयति मध्यमपुरुषबहुवचनेन याहितयात यातेति यातपद्दे याहि याहीति
म्र्वयं याय एवं भूतेभविष्यतोरप्युदाहरणं यास्यति इति याहि याहि अयासीत इति या
हि याहि मध्यमपुरुषबवचनेध्वम्पोर्लद्धे अधीध्व अधीध्वमिति यूयमधीध्वे पद्धे अधी
ध्व अधीध्वमित्यधीध्वं भावकर्मणोस्तु भूयस्व भूयस्वेति भूयते पच्यस्व पच्यस्वेति पच्यते
इत्यादिर्नैयं अनेकक्रियासमुच्चयेवा लोडन्तस्य हि स्वानधर्मो विषयेवा सामान्यार्थे

सः
५३

सपातेराङ्प्रयोगातिवादयः चिनोति भावे स्वादेशप्रत्यये कृते सन्नुडीयते इति सन्नुडुपः
अस्मिन्सत्येवपोनःपुन्यभृशार्थेवत्तवर्तमानात् हित्वमकान्यैवोदाहरंतितथ्यमोस्त्वपि
वतस्वादस्वेतिप्रयंअभ्यवहरथ पदेपिवस्वादेतियूयं अभ्यवहरथभृशं आस्वादध्वमि
तियूयं अभ्यवहरध्वे पदे भंत्व आस्वादस्वेति यूयं अभ्यवहरध्वेलोडभावपक्षेतत्
न पिवतिधानाःखादति अन्नंभुंक्ते हाधिकमास्वादतेधानाःभक्षयवेत्तियामिमम
रः इथासंस्कृतदाधिकव्यंजनादिदशेमवस्करलनीहिंनंदनंमुषानरत्वानिहतामरोश
नाविगट्यचक्रितनमुचिहिवावपीयश्यमस्वस्यमर्हनिशोदृः । इतिल्यकारार्थप्रक्रि
यासमाप्तः श्रीरामायनमः शुभंभूयात् समाप्तोयंग्रंथः॥

180

लृ॰
५३

स्यातेरनुप्रयोगातिवादयः चिनोतेर्भावेस्त्वादेशत्वप्रत्ययेकृतेसमुच्चीयतेइतिसमुच्चयः
अस्मिन्स्तेवपीनःपुन्येभृशार्थेचेनानुवर्तमानात् हित्वमहाप्येवोदाहरतिनधर्मोस्तुपि
वतस्वादस्वेतिनिमृयंअभ्यवहारय पहेपिवस्वादेतिमृयं अभ्यवहारयभक्षं आस्वादस्वमि
तिमृयं अभ्यवहारय्ये पहे भंक्ष्व आस्वादस्वेति मृयं अभ्यवहार्येलोडभावयेत्सकृ
न् पिवतिधानाःखादति अत्रभक्ते हायिकमास्व [illegible]
रः दध्यासंस्कृतदाधिकव्यंजनादिप्रोमवस्कारत्व [illegible]
नाविगत्यचाकिनमृविहितावर्षीयइमसस्वस्यम [illegible]
यासमाप्तः श्रीरामायनमः शुभंभूयात [illegible]

180